पाणावाहितमोदकाय सुमनोबाणारिडिम्भाय ते ॥ ८२॥

हाहाद्यैरुपवीणिताद्भुतगुणव्यूहाय वैहायसै-
व्योहारैर्निङ्गमान्तगैर्विबुधसन्दोहाभिनन्द्यात्मने ।
बाहापङ्क्तिशिखोद्गलन्मदपरीवाहानुमिश्रश्रवो-
जाहामन्दमरन्दसौरभलसद्देहाय भूयो नमः (?) ॥ ८३॥

रुष्टा या जगदेव भस्म कुरुते तुष्टा तु सिद्धीर्ददा-
त्यष्टावष्यथ यत्पदाब्जयुगलौजुष्टो विरक्त्या यदा ।
हृष्टास्मै वितरत्यनन्यसुलभामिष्टां गतिं शाश्वतीं
कष्टापायकृते भजे श्रुतिशिखोदुष्टां परां देवताम् ॥ ८४॥

धर्माधर्मविवेचनेऽप्यचतुरो दुर्मार्गगामी सदा
कर्मापेक्षफलप्रदाननुसरन् शर्माप्नुयां किं कदा ।
नर्मालोकनमात्रतोऽस्तदुरितं निर्माय सर्वार्थदं
धर्मार्तोऽभ्रमिव व्रजामि शरणं भर्माद्रिचापात्मजम् ॥ ८५॥ (भर्म - हेम)
विन्ध्याद्रिस्मयहारिणा घटभुवा वन्ध्यावलेपाधिना-
यं ध्यात्वाधिगता कला न यदि को रुन्ध्यादतोऽन्यः पुमान् ।
सन्ध्याकारिमहागिरि जलनिधि बन्ध्याद्गणेशेशं
तं ध्यायेम भवाब्धिमद्य भगवन् सन्ध्याशु नागानन ॥ ८६॥

श्रुत्वा दैत्यगणावृतं त्रिभुवनं मत्वा परावध्यतां
गत्वा काश्यपसूनुतां युगबलाद्धत्वा रिपूनञ्जसा ।
हृत्वा भूमिभरं सुरान् स्थिरपदान् कृत्वा प्रथामागम-
त्तत्त्वातीतममुं गणेशमसकृन्नत्वा भवेयं कृती ॥ ८७॥

पूर्वाद्रेः शिखरोदितस्य रुचिरश्रीर्वासराधीशितु-
र्गौरिण्यमले विभाति तु यथा दूर्वाग्रभागस्थिते ।
गीर्वाणेशखगेशमौक्तिकमणिश्रीर्वाब्जरागद्युतिः
शापित्य तवाकृतिः स्फुरतु धीकार्वाहिता मेऽनिशं (?) ॥ ८८॥

तुच्छात्यल्पसुखावहेषु विषयेविच्छानुरोधाद्भ्रमन्
कच्छापेतभवात्रवान्तरनिशप्रच्छादितात्मा चिरात् ।
इच्छातीतफलप्रदं गणपतिं गच्छामि देवं गतिं
चिच्छायामतिदिश्य सन्दिशतु मे तच्छाश्वतं वैभवम् ॥ ८९॥

स्वं त्रातुं न भवाम्बुधौ निपतितं तन्त्रादिना पारये

